# Saptasaptisaptakam

# સપ્તસપ્તિસપ્તકમ્

## Document Information

Text title : Saptasaptisaptakam

File name : saptasaptisaptakam.itx

Category : navagraha, ApaTIkara

Location : doc_z_misc_navagraha

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

# સપ્તસપ્તિસપ્તકમ્

(ચામર)

ધ્વાન્ત-દન્તિ-કેસરી હિરણ્ય-કાન્તિ-ભાસુરઃ
કોટિ-રશ્મિ-ભૂષિતસ્તમોહરોઽમિતદ્યુતિઃ ।
વાસરેશ્વરો દિવાકરઃ પ્રભાકરઃ ખગો
ભાસ્કરઃ સદૈવ પાતુ માં વિભાવસૂ રવિઃ ॥ ૧॥

યક્ષ-સિદ્ધ- કિન્નરાદિ-દેવયોનિ-સેવિતં
તાપસૈરૃષીશ્વરૈશ્ચ નિત્યમેવ વન્દિતમ્ ।
તપ્ત-કાઞ્ચનાભમર્કમાદિદૈવતં રવિં
વિશ્વ-ચક્ષુષં નમામિ સાદરં મહાદ્યુતિમ્ ॥ ૨॥

ભાનુના વસુન્ધરા પુરૈવ નિમિતા, તથા
ભાસ્કરેણ તેજસા સદૈવ પાલિતા મહી ।
ભૂર્વિલીનતાં પ્રયાતિ કાશ્યપેયવર્ચસા
તં રવિ ભજામ્યહં સદૈવ ભક્તિચેતસા ॥ ૩॥

અંશુમાલિને તથા ચ સપ્ત-સપ્તયે નમો
બુદ્ધિદાયકાય શક્તિદાયકાય તે નમઃ ।
અક્ષરાય દિવ્ય-ચક્ષુષેઽમૃતાય તે નમઃ
શઙ્ખ-ચક્ર-ભૂષણાય વિષ્ણુ-રૂપિણે નમઃ ॥ ૪॥

ભાનવીય-ભાનુભિર્નભસ્તલં પ્રકાશતે
ભાસ્કરસ્ય તેજસા નિસર્ગ એષ વર્ધતે ।
ભાસ્કરસ્ય ભા સદૈવ મોદમાતનોત્યસૌ
ભાસ્કરસ્ય દિવ્ય-દીપ્તયે સદા નમો નમઃ ॥ ૫॥

અન્ધકાર-નાશકોઽસિ રોગનાશકસ્તથા
ભો મમાપિ નાશયાશુ દેહ-ચિત્ત-દોષતામ્ ।
પાપ-દુઃખ-દૈન્યહારિણં નમામિ ભાસ્કરં

    શક્તિ-ધૈર્ય-બુદ્ધિ-મોદ-દાયકાય તે નમઃ ॥ ૬॥

ભાસ્કરં દયાર્ણવં મરીચિમન્તમીશ્વરં
    લોકરક્ષણાય નિત્યમુદ્યતં તમોહરમ્ ।
ચક્રવાક-યુગ્મ-યોગ-કારિણં જગત્પતિં
    પદ્મિનીમુખારવિન્દ-કાન્તિવર્ધનં ભજે ॥ ૭॥

સપ્તસપ્તિ-સપ્તકં સદૈવ યઃ પઠેન્નરો
    ભક્તિયુક્તચેતસા હૃદિ સ્મરન્ દિવાકરમ્ ।
અજ્ઞાતા-તમો વિનાશ્ય તસ્ય વાસરેશ્વરો
    નીરુજં તથા ચ તં કરોત્યસૌ રવિઃ સદા ॥ ૮॥

ઇતિ શ્રી આપટીકરવિરચિતં સપ્તસપ્તિસપ્તકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Saptasaptisaptakam*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*